# Krishnalalanakhyavratanirupanam

# कृष्णलालनाख्यव्रतनिरूपणम्

## Document Information

Text title : Krishnalalanakhyavratanirupanam

File name : kRRiShNalAlanAkhyavratanirUpaNam.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 139/39-60||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# कृष्णलालनाख्यव्रतनिरूपणम्

अथ कृष्णलालनाख्यं व्रतं वच्मि च ते रमे ।
विभूतयो भवन्त्येव कृष्णलालनसद्व्रतात् ॥ ३९॥

कार्तिके चैत्रके वैशाखके मार्गे च फाल्गुने ।
आषाढे शुक्लके दिनत्रयात्मकं व्रतं त्विदम् ॥ ४०॥

सुलघुभुग्दशम्यां तु रात्रौ शीलव्रती भवेत् ।
कृत्वा सायन्तनीं पूजां गृह्णीयान्नियमं व्रती ॥ ४१॥

एकादश्यां निराहारं करिष्येऽहं व्रतं त्विति ।
नमो नारायणायेति प्रातरुत्थाय चिन्तयेत् ॥ ४२॥

स्नात्वैकादशिकाप्रातर्मण्डपे पूजयेत् प्रभुम् ।
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ॥ ४३॥

शुक्लपुष्पाक्षतवारिकुङ्कुमचन्दनादिभिः ।
नमो विभूतये पादौ नमोऽशोकाय जानुनी ॥ ४४॥

नमः कृष्णायेत्यूरू च विश्वमूर्ते नमः कटिम् ।
कन्दर्पाय नमो मेढ्रं फलं नारायणाय च ॥ ४५॥

दामोदरायेत्युदरं वासुदेवाय च स्तनौ ।
माधवायेत्युरो विष्णोः कण्ठमुत्कण्ठिने नमः ॥ ४६॥

श्रीधराय मुखं केशान् केशवायेति मस्तकम् ।
पृष्ठं शार्ङ्गधरायेति श्रवणौ श्रुतिवेदिने ॥ ४७॥

हरये शङ्खचक्रासिगदाजलजपाणये ।
शिरः सर्वात्मने तस्मै नम इत्यभिपूजनम् ॥ ४८॥

मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः ।
उदकुम्भे न्यसेत्तच्च दाने प्रपूज्य वै दिशेत् ॥ ४९॥

गुडपात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम् ।
फलानि विविधान्येव दाने प्रपूज्य चार्पयेत् ॥ ५० ॥

आरार्त्रिकं प्रकुर्याच्च विभूतिश्रीश्रीकृष्णयोः ।
नैवेद्यानि विचित्राणि प्रातर्मध्ये निशामुखे ॥ ५१ ॥

दत्वा प्रस्वापयेच्चापि गीतवादित्रकोत्सवैः ।
जागरणं व्रती कुर्यात् प्रातः स्नात्वा प्रपूज्येत् ॥ ५२ ॥

द्वादश्यां प्रार्थयेच्चापि पद्मं दद्याद्द्विजाय तु ।
उदकुम्भं सरत्नं च गां दद्याद्गुरवे तथा ॥ ५३ ॥

यथा न मुच्यसे कृष्ण सदा सर्वविभूतिभिः ।
तथा मामुद्धराशेषदुःखसंसारसागरात् ॥ ५४ ॥

शय्यां दद्याद्धनं दद्याद्ग्रामं क्षेत्रं गृहादिकम् ।
गुरुं सम्पूज्य विधिवद्भूषावस्त्राणि चार्पयेत् ॥ ५५ ॥

अधनः पूजयेत्पुष्पैर्भोजनान्नं दिशेद्व्रती ।
अनेन विधिना यस्तु कृष्णलालनसद्व्रतम् ॥ ५६ ॥

विभूतिसम्प्रदं कुर्यात्तस्यर्द्धयः पदे पदे ।
पापानि तस्य नश्यन्ति पितृणां तारयेच्छतम् ॥ ५७ ॥

जन्मनां शतसाहस्रं न शोकफलभाग्भवेत् ।
न तु व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम् ॥ ५८ ॥

यावद्युगसहस्राणां शतमष्टोत्तरं भवेत् ।
तावत्स्वर्गे वसेच्चापि भूपतिः सः पुनर्भवेत् ॥ ५९ ॥

व्रतं कृत्वा हरेर्धाम प्रयात्येव न संशयः ।
सर्वान् कामानश्नुते च कृष्णेन हरिणा सह ॥ ६० ॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे १३९-अध्यायान्तर्गतं कृष्णलालनाख्यव्रतनिरूपणं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय १३९/३९-६० ॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 139/39-60..

Proofread by PSA Easwaran

*Krishnalalanakhyavratanirupanam*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*